तत् प्रायश्चित्तपरम्। इति तन्त्रसारः ॥ * ॥
योगाङ्गषट्प्रकारक्रिया। तद्यथा,—
"धौतिर्वस्तिस्तथा नेतिर्नौलिकी त्राटकस्तथा।
कपालभातिश्चैतानि षट्कर्म्माणि समाचरेत् ॥
अन्तर्धौतिर्दन्तधौतिर्हृद्धौतिर्मूलशोधनम्।
धौत्यश्चतुर्विधाः प्रोक्ता घटं कुर्व्वन्ति निर्म्मलम् ॥
वातसारं वारिसारं वह्निसारं बहिष्कृतम्।
घटस्य निर्म्मलार्थाय अन्तर्धौतिश्चतुर्विधा ॥"*॥
प्रयोगः।
"काकचञ्चुवदास्येन पिबेद्वायुं शनैः शनैः।
चालयेदुदरं पश्चाद्वर्त्मना रेचयेत् शनैः ॥
वातसारं परं गोप्यं देहनिर्म्मलकारकम्।
सर्व्वरोगक्षयकरं देहानलविवर्द्धकम् ॥१॥
आकण्ठं पूरयेद्वारि वक्त्रेण च पिबेत् शनैः।
चालयेदुदरेणैव चोदराद्रेचयेदधः ॥
वारिसारं परं धौतं देहनिर्म्मलकारकम्।
साधयेद्यः प्रयत्नेन देवदेहं प्रपद्यते ॥२॥
नाभिग्रन्थिं मेरुपृष्ठं शतवारञ्च कारयेत्।
उदरामयजां त्यक्त्वा जठराग्निं विवर्द्धयेत्।
वह्निसारमिदं धौतं योगिनां योगसिद्धिदम् ॥३॥
काकीमुद्रां साधयित्वा पूरयेदुदरं मरुत्।
धारयेदर्द्धयामन्तु चालयेदधवर्त्मना ॥
इदं धौतं परं गोप्यं न प्रकाश्यं कदाचन।
नाभिमग्नजले स्थित्वा शक्तिनाड़ीं विसर्ज्जयेत् ॥
कराभ्यां क्षालयेन्नाड़ीं यावन्मलविसर्ज्जनम्।
तावत् प्रक्षाल्य नाड़ीञ्च उदरे वेशयेत् पुनः ॥
इदं प्रक्षालनं गोप्यं देवानामपि दुर्लभम्।
केवलं धौतिमात्रेण देवदेहो भवेत् ध्रुवम् ॥
यामार्द्धधारणात् शक्तिं यावन्न साधयेन्नरः।
वहिष्कृतमहद्धौतिस्तावन्नैव न जायते ॥ ४ ॥
दन्तमूलं जिह्वामूलं रन्ध्रे च कर्णयुग्मयोः।
कपालरन्ध्रं पञ्चैते दन्तधौतिर्विधीयते ॥*"॥
प्रयोगः
"खादिरेण रसेनाथ मृत्तिकाभिश्च शुद्धिभिः।
मार्ज्जयेद्दन्तमूलञ्च यावत् किल्विषमाहरेत् ॥
दन्तमूलं परं धौतिर्योगिनां योगसाधने।
नित्यं कुर्य्यात् प्रभाते च दन्तरक्षाय योगवित् ॥
दन्तमूलं धारणादिकार्य्येषु योगिनां यतः ॥१।
अथातः संप्रवक्ष्यामि जिह्वाशोधनकारणम् ॥
जरामरणरोगादि नाशयेत् दीर्घलम्बिका।
तर्ज्जनी मध्यमानामा अङ्गुलित्रययोगतः ॥
वेशयेद्गलमध्ये तु मार्ज्जयेल्लम्बिकामलम्।
शनैः शनैर्म्मार्ज्जयित्वा कफदोषं निवारयेत् ॥
मार्ज्जयेन्नवनीतेन दोहयेच्च पुनः पुनः।
तदग्रं लोहयन्त्रेण घर्षयित्वा पुनः पुनः ॥
नित्यं कुर्य्यात् प्रयत्नेन रवेरुदयकेऽस्तके।
एवं कृते तु नित्ये च लम्बिका दीर्घतां गता ॥२
तर्ज्जन्यङ्गुल्यकाग्रेण मार्ज्जयेत् कर्णरन्ध्रयोः।
नित्यमभ्यासयोगेन नादान्तरप्रकाशनम् ॥३॥४॥
वृद्धाङ्गुष्ठेन दक्षेण मार्ज्जयेद्भालरन्ध्रकम्।
एवमभ्यासयोगेन कफदोषं निवारयेत् ॥
नाड़ीनिर्म्मलतां याति दिव्यदृष्टिः प्रजायते।
निद्रान्ते भोजनान्ते च दिवान्ते च दिने दिने ॥५
हृद्धौतिं त्रिविधां कुर्य्यात् दण्डवज्जलवाससा।
रम्भादण्डं हरिद्दण्डं वेत्रदण्डन्तथैव च ॥
हृन्मध्ये चालयित्वा तु पुनः प्रत्याहरेत् शनैः।
कफपित्तं तथा क्लेदं रेचयेदूर्द्धवर्त्मना।
दण्डधौतिविधानेन हृद्रोगं नाशयेत् ध्रुवम् ॥"
हरिद्दण्डं वटभुरि ॥ १ ॥
"भोजनान्ते पिबेद्वारि आकण्ठं पूर्णितं सुधीः।
ऊर्द्धदृष्टिं क्षणं कृत्वा तज्जलं वमयेत् पुनः।
नित्यमभ्यासयोगोऽयं कफपित्तं निवारयेत् ॥२
चतुरङ्गुलविस्तारं सूक्ष्मवस्त्रं शनैर्ग्रसेत्।
पुनः प्रत्याहरेदेतत् प्रोच्यते धौतकर्म्मकम् ॥
गुल्मज्वरप्लीहकुष्ठं कफपित्तं विनश्यति।
आरोग्यं बलपुष्टिश्च भवेत्तस्य दिने दिने ॥ ३ ॥
अपानक्रूरतां तावन्मलं यावन्न शोधयेत्।
तस्मात् सर्व्वप्रयत्नेन मलशोधनमाचरेत् ॥
पीतमूलस्य दण्डेन मध्यमाङ्गुलिनापि वा।
यत्नेन क्षालयेद्गुह्यं वारिणा च पुनः पुनः ॥
वारयेत् कोष्ठकाठिन्यमामाजीर्णं निवारयेत्।
कारणं कान्तिपुष्ट्योश्च दीपनं वह्निमण्डलम् ॥*॥
जलवस्तिः शुष्कवस्तिर्वस्ती च द्विविधौ स्मृतौ।
जलवस्तिं जले कुर्य्यात् शुष्कवस्तिं क्षितौ सदा ॥
नाभिमग्नजले पायुं न्यस्तनालोत्कटासनम्।
आकुञ्चनं प्रकाशञ्च जलवस्तिं समाचरेत् ॥
प्रमेहञ्च गुदावर्त्तं क्रूरवायुं निवारयेत्।
भवेत् स्वच्छन्ददेहश्च कामदेवसमो भवेत् ॥"
न्यस्तनालोत्कटासनं जलहृदये हस्तं दत्त्वा शारङ्गवदुदरं कुर्य्यादित्यर्थः ॥१।
"वस्तिं पश्चिमतानेन चालयित्वा शनैः शनैः।
अश्विनीमुद्रया पायुं आकुञ्चयेत् प्रकाशयेत् ॥
एवमभ्यासयोगेन कोष्ठदोषो न विद्यते।
विवर्द्धयेत् जाठराग्निं आमवातं विनाशयेत् ॥२
वितस्तिमानं सूक्ष्मसूत्रं नाशानाले प्रवेशयेत्।
मुखान्निर्गमयेत् पश्चात् प्रोच्यते नेतिकर्म्मकम् ॥
साधनान्नेतिकर्म्मापि खेचरीसिद्धिमाप्नुयात्।
कफदोषा विनश्यन्ति दिव्यदृष्टिश्च जायते ॥*॥
अमन्दवेगे तुन्दञ्च भ्रामयेदुभपार्श्वयोः।
सर्व्वरोगान्निहन्तीह देहानलविवर्द्धनम् ॥" (

इति नौलिकी ॥*॥

"निमेषोन्मेषकं त्यक्त्वा सूक्ष्मलक्ष्यं निरीक्षयेत्।
यावदश्रु निपतति त्राटकं प्रोच्यते बुधैः ॥
एवमभ्यासयोगेन शाम्भवी जायते ध्रुवम्।
न जायते नेत्ररोगो दिव्यदृष्टिप्रदायकम् ॥*॥
सीत्कृत्य पीत्वा वक्त्रेण नासानालैर्विरेचयेत्।
व्युत्क्रमेण व्युत्क्रमेण सीत्क्रमेण विशेषतः ॥
भालभातिं त्रिधा कुर्य्यात् कफदोषं निवारयेत् ॥
ईड़या पूरयेद्वायुं रेचयेत् पिङ्गलया पुनः।
पिङ्गलया पूरयित्वा पुनश्चन्द्रेण रेचयेत् ॥
पूरकं रेचकं कृत्वा वेगेन न तु धारयेत्।
एवमभ्यासयोगेन कफदोषं निवारयेत् ॥*॥
नासाभ्यां जलमाकृष्य वक्त्रेण रेचयेत् पुनः।
पायं पायं प्रकुर्व्वंश्चेत् श्लेष्मदोषं निवारयेत् ॥
न जायते वार्द्धकञ्च ज्वरो नैव प्रजायते ॥"
इति घेरण्डसंहितायां षट्कर्म्मशोधनं प्रथमोऽध्यायः ॥

षट्कर्म्मा,[न्] पुं, (षट् कर्म्माणि यजनादीनि यस्य। यागादिभिर्युतो ब्राह्मणः। इत्यमरः। तथा च।
"इज्याध्ययनदानानि याजनाध्यापने तथा।
प्रतिग्रहश्च तैर्युक्तः षट्कर्म्मा विप्र उच्यते ॥"
षट् कर्म्माण्यस्य इति बहुव्रीहिः। इति भरतः।

षट्कूटा, स्त्री, भैरवीविशेषः। यथा,—

अथ षट्कूटा भैरवी।

"डाकिनी राकिनी बीजे लाकिनी काकिनीयुगम्।
साकिनी हाकिनी बीजे आहृत्य सुरसुन्दरि ॥
आद्यमैकारसंयुक्तमन्यदौकारमण्डितम्।
शक्रस्वरान्वितं देवि तार्त्तीयं बीजमालिखेत्।
बिन्दुनादकलाक्रान्तं त्रितयं शैलसम्भवे ॥"
तृतीयबीजं सविसर्गं इत्यपि केचित्। तन्त्रान्तरे।
"ऊरौ क्षमामादनं जीवं शिवमत्र त्रिधा लिखेत्
अर्केण मायाशक्राभ्यां क्रमात्तं मण्डितं कुरु ॥
बिन्दुनादान्वितं चाद्यद्वयमन्त्यं विसर्गवत्।
ध्यानमस्याः प्रवक्ष्यामि सर्व्वभूतनिकृन्तनम् ॥
बालसूर्य्यप्रभां देवीं जवाकुसुमसन्निभाम्।
मुण्डमालावलीरम्यां बालसूर्य्यसमांशुकाम् ॥
सुवर्णकलसाकारपीनोन्नतपयोधराम्।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम् ॥"
दधतीमिति शेषः।
"हिराहत्तया षड़ङ्गानि विधाय परमेश्वरि।
यन्त्रमस्या वरारोहे त्रिकोणं तत्पुटं लिखेत् ॥
वहिरष्टदलं पद्मं रविपत्रं ततो लिखेत्।
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत् ॥
षड़ङ्गावरणं देवि! पूजयेत् पूर्व्ववच्छिवे।
रत्यादि त्रितयं देवि त्रिकोणे परिपूजयेत् ॥
डाकिन्याद्याश्च षट्कोणे वसुपत्रे ततः परम्।
ब्राह्म्यादि युगलं पश्चाद्रविपत्रे ततः परम् ॥
बालायाः पीठशक्तीस्तु वामाद्याः पूजयेत् क्रमात्।
चतुरस्रे लोकपालान् सायुधान् परमेश्वरि।
अनेनैव विधानेन नित्याख्यां भैरवीं यजेत् ॥"

इति तन्त्रसारः ॥

षट्कोणं, क्ली, लग्नात् षष्ठगृहम्। तत्तु रिपुस्थानम्। यथा,—
"पातालं हिबुकं चैव सुहृदम्बुश्चतुर्थकम्।
त्रित्रिकोणञ्च नवमं दुश्चिक्यं स्यात् तृतीयकम् ॥
धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम्।
द्युनं द्युनं तथास्ताख्यं षट्कोणं रिपुमन्दिरम् ॥"

इति ज्योतिस्तत्त्वम् ॥*॥

(षट् कोणा यस्य।) वज्रम्। इति राजनिर्घण्टः ॥ षड़स्रन्तन्त्रोक्तो यन्त्रभेदः। यथा, गणेशयन्त्रम्।